# Shri Tyagesha Stuti

# શ્રીત્યાગેશસ્તુતિઃ

## Document Information

Text title : Shri Tyagesha Stuti 06 25

File name : tyAgeshastutiH.itx

Category : shiva, stuti, aShTaka

Location : doc_shiva

Proofread by : Gopalakrishnan

Description/comments : From stotrArNavaH 06-25

Latest update : September 18, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 19, 2021

*sanskritdocuments.org*

# Shri Tyagesha Stuti

## શ્રીત્યાગેશસ્તુતિઃ

યસ્યાજ્ઞયા નવચ્છિદ્રે સ્તબ્ધસ્તિષ્ઠતિ મારુતઃ ।
તં નમામિ મહાદેવં ત્યાગેશં ભક્તવત્સલમ્ ॥ ૧॥

શાસનાત્ પાવકો યસ્ય સર્વેષામન્તરા સ્થિતઃ ।
તં નમામિ મહાદેવં ત્યાગેશં ભક્તવત્સલમ્ ॥ ૨॥

બડબામુખવહ્નિશ્ચ જ્વલત્યબ્ધૌ યદાજ્ઞયા ।
તં નમામિ મહાદેવં ત્યાગેશં ભક્તવત્સલમ્ ॥ ૩॥

ભૂતાન્યપિ વિરુદ્ધાનિ મિલિતાનિ યદાજ્ઞયા ।
તં નમામિ મહાદેવં ત્યાગેશં ભક્તવત્સલમ્ ॥ ૪॥

કલમન્વેતિ કર્તારં કર્મણાં યસ્ય શાસનાત ।
તં નમામિ મહાદેવં ત્યાગેશં ભક્તવત્સલમ્ ॥ ૫॥

વિનાધારં જગદ્યેન સાધારમિવ નિશ્ચલમ્ ।
તં નમામિ મહાદેવં ત્યાગેશં ભક્તવત્સલમ્ ॥ ૬॥

ઔષધે વા મણૌ મન્ત્રે ભાતિ શક્તિર્યદાજ્ઞયા ।
તં નમામિ મહાદેવં ત્યાગેશં ભક્તવત્સલમ્ ॥ ૭॥

નાત્યેતિ સમયં જ્યોતિઃ સિન્ધુઃ કાલશ્ચ યદ્ભયાત્ ।
તં નમામિ મહાદેવં ત્યાગેશં ભક્તવત્સલમ્ ॥ ૮॥

બ્રહ્માચ્યુતાદ્યવિદિતં ચ શિરઃ પદં તે
    નાસા શિલાવિહિત ? ? સુહૃત્ પ્રિયાયાઃ ।
તસ્મૈ નમોઽસ્તુ ભવતે પ્રણતાર્તિહન્ત્રે
    ત્યાગેશ્વરાય મયિ દેહિ દયાવલોકમ્ ॥ ૯॥

ઇતિ શ્રીત્યાગેશસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by Gopalakrishnan

*Shri Tyagesha Stuti*

pdf was typeset on September 19, 2021

Please send corrections to *sanskrit@cheerful.com*